# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः
# देवासमार्गः,उज्जयिनी (म.प्र.)

## स्नातकपाठ्यक्रमः

शास्त्रिवार्षिकपरीक्षा

शास्त्री–प्रथम / द्वितीय / तृतीयवर्षस्य पाठ्यक्रमः

नियमितस्वाध्यायिच्छात्राणां कृते

सत्रम् 2017-18, 2018-19 एवं 2019-20

## प्राच्यसंस्कृतम्

विषयाः-1. अनिवार्यसंस्कृतम्

2. कवर्गीयः विषयः-

1.शुक्लयजुर्वेदः

2.नव्यव्याकरणम्

3.साहित्यम्

4.फलितज्योतिषम्

5.सिद्धान्तज्योतिषम्

# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः,उज्जयिनी (म.प्र.)

## शास्त्री-वार्षिकपरीक्षापाठ्यक्रमः

## नियमावलिः

**1.पाठ्यक्रमस्वरूपम् -**

1. शास्त्रिपरीक्षायाः पाठ्यक्रमः त्रिवर्षीयः विद्यते। तत्र प्रतिवर्षं नव प्रश्नपत्राणि 50–50 अङ्कानां सन्ति। तत्र प्रथम–द्वितीय–तृतीयचतुर्थ पत्राणि अनिवार्यपत्राणि सन्ति। चतुर्थ–पञ्चम षष्ठ सप्तम् पत्राणि कवर्गे वैकल्पिकानि सन्ति तथा च अष्टमं नवम च पत्रम् खवर्गे वैकल्पिकं विद्यते।

1. प्रथमद्वितीय तृतीयप्रश्नपत्रेषु : मध्यप्रदेशस्य उच्चशिक्षाविभागद्वारा निर्धारितः आधारपाठ्यक्रमः अनिवार्यतया पठनीयो भविष्यति।
2. चतुर्थप्रश्नपत्रं (अनिवार्यसंस्कृतम्) सर्वेभ्यः अनिवार्यम्।
3. पञ्चम–षष्ठ सप्तम प्रश्नपत्राणि पञ्चाशतपञ्चाशदङ्कानां कवर्गे वैकल्पिकविषयसम्बद्धानि सन्ति। तत्र प्रवेशार्थी प्रवेशसमितेरनुशंसया साहित्य नव्यव्याकरण शुक्लयजुर्वेद फलित सिद्धान्त ज्योतिषविषयेषु कमप्येकं स्वीकर्तुं शक्नोति।
4. अष्टमं नवम च प्रश्नपत्रम् खवर्गे वैकल्पिकविषयसम्बद्धम्। तत्र प्रवेशार्थी हिन्दीसाहित्य–अंग्रेजी–साहित्य–अर्थशास्त्र–समाजशास्त्र–इतिहास–राजनीतिविज्ञान–विषयेषु कमप्येकं स्वीकर्तुं शक्नोति।

**2.प्रवेशनियमाः -**

शास्त्रिपरीक्षायां वक्ष्यमाणपरीक्षोतीर्णः प्रवेशमर्हति –

(1) मध्यप्रदेशस्थ – महर्षिपतञ्जलिसंस्कृतसंस्थानस्य उत्तरमध्यमापरीक्षोत्तीर्णः अथवा भारतस्य कस्यापि प्रादेशिकशासनस्य शिक्षाविभागद्वारा प्राप्तमान्यताकसंस्थायाः विश्वविद्यालयस्य वा तत्समकक्षपरीक्षोत्तीर्णः।

(2) मध्यप्रदेशस्थ–माध्यमिकशिक्षामण्डलस्य उच्चतरमाध्यमिक (इण्टर मीडियट) परीक्षोत्तीर्णः अथवा भारतस्य कस्यापि प्रादेशिकशासनस्य शिक्षाविभागद्वारा प्राप्तमान्यताकसंस्थायाः संस्कृतेन सह तत्समकक्षपरीक्षोत्तीर्णः प्रवेशसमितेरनुशंसया प्रवेशार्हः।

(3) शास्त्रिपरीक्षायां साहित्यम्, नव्यव्याकरणम्, शुक्लयजुर्वेदः, फलितज्योतिषम् सिद्धान्तज्योतिषम् च इत्येतेषु कवर्गीयविषयेषु कमप्येकं विषयं स्वीकर्तुं शक्यते। किन्तु शुक्लयजुर्वेदं, नव्यव्याकरणं सिद्धान्तज्योतिषम् च स एव छात्रः स्वीकर्तुं शक्नोति येन तं विषयं मुख्यविषयत्वेन गृहीत्वा उत्तरमध्यमापरीक्षा उत्तीर्णा कृता स्यात्।

(4) शास्त्रिपरीक्षायां खवर्गीयविषयपाठ्यक्रमे राजनीतिविज्ञानम्, अर्थशास्त्रम्, इतिहासः हिन्दीसाहित्यम्, अंग्रेजीसाहित्यम्, समाजशास्त्रम् च विषयाः स्वीकृताः सन्ति। प्रवेशार्थी छात्रः उक्तेषु कमप्येकं विषयं स्वीकर्तुं शक्नोति।

अध्यक्ष
विश्वविद्यालय अध्यापन विभाग
महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन

# नियमितच्छात्राणां कृते शास्त्रीपरीक्षापाठ्यक्रमस्वरूपम्

| प्रश्नपत्रम् | विषयः | आन्तरिक मूल्यांकनम् | बाह्य परीक्षा (सैद्धांतिक) | पूर्णांकाः | उत्तीर्णांकाः आन्तरिक मूल्यांकनम् | उत्तीर्णांकाः बाह्य परीक्षा (सैद्धांतिकम्) | उत्तीर्णांकाः योगः |
|---|---|---|---|---|---|---|---|
| प्रथमम् | आधारपाठ्यक्रमः | 10 | 40 | 50 | 03 | 14 | 17 |
| द्वितीयम् | आधारपाठ्यक्रमः | 10 | 40 | 50 | 03 | 14 | 17 |
| तृतीयम् | आधारपाठ्यक्रमः | 10 | 40 | 50 | 03 | 14 | 17 |
| चतुर्थम् | अनिवार्यसंस्कृतम्-I | 10 | 40 | 50 | 03 | 14 | 17 |
| पञ्चमम् | कवर्गीयः विषयः- शुक्लयजुर्वेद, साहित्यम् नव्यव्याकरणम् फलितज्योतिषम् सिद्धान्तज्योतिषम् | 10 | 40 | 50 | 03 | 14 | 17 |
| षष्ठम् | कवर्गीयः विषयः- शुक्लयजुर्वेद, साहित्यम् नव्यव्याकरणम् फलितज्योतिषम् सिद्धान्तज्योतिषम् | 10 | 40 | 50 | 03 | 14 | 17 |
| सप्तमम् | कवर्गीयः विषयः- शुक्लयजुर्वेद, साहित्यम् नव्यव्याकरणम् फलितज्योतिषम् सिद्धान्तज्योतिषम् | 10 | 40 | 50 | 03 | 14 | 17 |
| अष्टमम् | खवर्गीयः विषयः हिन्दीसाहित्यम् अङ्ग्रेजी साहित्यम् अर्थशास्त्रम् समाजशास्त्रम् राजनीतिविज्ञानम् इतिहासः | 10 | 40 | 50 | 03 | 14 | 17 |
| नवमम् | खवर्गीयः विषयः हिन्दीसाहित्यम् अङ्ग्रेजी साहित्यम् अर्थशास्त्रम् समाजशास्त्रम् राजनीतिविज्ञानम् इतिहासः | 10 | 40 | 50 | 03 | 14 | 17 |
| योगः | ------------------ | 90 | 360 | 450 | 27 | 126 | 153 |

अधिष्ठाता
विश्वविद्यालय अध्यापन विभाग

# स्वाध्यायिच्छात्राणा कृते शास्त्रीपरीक्षापाठ्यक्रमस्वरूपम्

| प्रश्नपत्रं | विषय | आन्तरिक मूल्यांकनम् | बाह्य परीक्षा (सैद्धांतिक) | पूर्णांका: | उत्तीर्णांका: | | |
|---|---|---|---|---|---|---|---|
| | | | | | आन्तरिक मूल्यांकनम् | बाह्य परीक्षा (सैद्धांतिक) | योग: |
| प्रथमम् | आधारपाठ्यक्रम: | ----------- | 50 | 50 | ----------- | 17 | 17 |
| द्वितीयम् | आधारपाठ्यक्रम: | | 50 | 50 | ----------- | 17 | 17 |
| तृतीयम् | आधारपाठ्यक्रम: | | 50 | 50 | ----------- | 17 | 17 |
| चतुर्थम् | अनिवार्यसंस्कृतम्-I | | 50 | 50 | ----------- | 17 | 17 |
| पञ्चमम् | कवर्गीय: विषय:-<br>शुक्लयजुर्वेद,<br>साहित्यम्<br>नव्यव्याकरणम्<br>फ़लितज्योतिषम्<br>सिद्धान्तज्योतिषम् | | 50 | 50 | ----------- | 17 | 17 |
| षष्ठ | कवर्गीय: विषय:-<br>शुक्लयजुर्वेद,<br>साहित्यम्<br>नव्यव्याकरणम्<br>फ़लितज्योतिषम्<br>सिद्धान्तज्योतिषम् | | 50 | 50 | ----------- | 17 | 17 |
| सप्तमम् | कवर्गीय: विषय:-<br>शुक्लयजुर्वेद,<br>साहित्यम्<br>नव्यव्याकरणम्<br>फ़लितज्योतिषम्<br>सिद्धान्तज्योतिषम् | | 50 | 50 | ----------- | 17 | 17 |
| अष्टमम् | खवर्गीय: विषय:<br>हिन्दीसाहित्यम्<br>अङ्ग्रेजी साहित्यम्<br>अर्थशास्त्रम्<br>समाजशास्त्रम्<br>राजनीतिविज्ञानम्<br>इतिहास: | | 50 | 50 | ----------- | 17 | 17 |
| नवमम् | खवर्गीय: विषय:<br>हिन्दीसाहित्यम्<br>अङ्ग्रेजी साहित्यम्<br>अर्थशास्त्रम्<br>समाजशास्त्रम्<br>राजनीतिविज्ञानम्<br>इतिहास: | | 50 | 50 | ----------- | 17 | 17 |
| योग: | --------------- | | 450 | 450 | | 153 | 153 |

अध्यक्ष
विश्वविद्यालय अध्यापन विभाग

## 3. परीक्षायोजना -

- शास्त्रिपरीक्षायाः चतुर्थ–पञ्चम–षष्ठसप्तमप्रश्नपत्राणां माध्यमं संस्कृतं भविष्यति।
- शास्त्रिपरीक्षायां प्रतिवर्षं उत्तीर्णतायै 33% अङ्काः निर्धारिताः। श्रेणीनिर्धारणं षष्ठरात्रार्द्धे परीक्षान्ते भविष्यति।
- शास्त्रिप्रथमद्वितीयतृतीयवर्षपरीक्षासु ( तृतीयवर्षे)
  उत्तीर्णतार्थं समष्टिरूपेण 33 प्रतिशतं, प्रतिपत्रं च 20 प्रतिशतमङ्काः अपेक्षिताः।
- आन्तरिकमूल्याङ्कने सैद्धान्तिकपरीक्षायां च पृथक्–पृथक् उत्तीर्णता आवश्यकी।
- कवर्गीय विषयेषु समष्टिरूपेण 33 प्रतिशतमङ्काः अनिवार्याः।
- आन्तरिकमूल्याङ्कने उत्तीर्णः एव सैद्धान्तिकपरीक्षायां सम्मेलितुमर्हः।

## 4.प्रश्नपत्रनिर्माणयोजना -

सामान्यतया प्रतिप्रश्नपत्रं निम्नानुसारं त्रिविधाः प्रश्नाः भविष्यन्ति। तत्र प्रतिप्रश्नं एको विकल्पोऽनिवार्यः।

प्रत्येकमेककतः अधोलिखितव्यवस्थानुसारं प्रश्नाः भवेयुः –

| | प्रश्नप्रकाराः | नियमितच्छाणांकृते | स्वाध्यायिच्छात्राणांकृते |
|---|---|---|---|
| 1 | बहुविकल्पीयप्रश्नाः | 1 x 5 = 5 | 1 x 5 = 5 |
| 2 | लघूत्तरीयप्रश्नाः | 3 x 5 = 15 | 3 x 5 = 15 |
| 3 | दीर्घोत्तरीयप्रश्नाः | 4 x 5 = 20 | 6 x 5 = 30 |

1). नियमितच्छात्राणांकृते बाह्यमूल्यांकनं 40 अङ्कानामान्तरिक मूल्यांकनं च 10 अङ्कानां विद्यते।
2). स्वाध्यायिच्छात्राणांकृते प्रत्येकं प्रश्नपत्रंम् 50-50 अङ्कानां भविष्यति तथा प्रत्येकः खण्डः (प्रतिइकाई) 10 अङ्कानां भविष्यति।

## 5.श्रेणिनिर्धारणम् -

शास्त्रिपरीक्षायां त्रिष्वपि वर्षेषु प्राप्ताङ्कानां योगाधारेण निम्नलिखितरूपेण श्रेणिनिर्धारणं भविष्यति :–

- 60 प्रतिशतम्, ततो वा अधिकाङ्कानां च प्राप्त्या प्रथमश्रेणिनिर्धारणम्।
- 45 प्रतिशतम् ततो वा अधिकाङ्कानां किन्तु 60 प्रतिशतमङ्केभ्यो न्यूनङ्कानां प्राप्त्या च द्वितीयश्रेणिनिर्धारणम्।
- 33 प्रतिशतम् ततो वा अधिकाङ्कानां किन्तु 45 प्रतिशतमङ्केभ्यो न्यूनङ्कानां प्राप्त्या च तृतीयश्रेणिनिर्धारणम्।

अध्यक्ष
विश्वविद्यालय अध्ययन विभाग
महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन